# ३१. गृहिण्योः सम्भाषणम् - III

शृणोति
शृण्वन्ति

सुनीता - अहो ! एषः भवत्याः पुत्रः सम्यक् गायति खलु । सङ्गीतकक्ष्यां गच्छति किम् ?

मधुरा - नैव तस्य भगिनी गृहे अभ्यासं करोति । सः श्रद्धया शृणोति । अतः गायति ।

सुनीता - अहं सङ्गीतं बहु इच्छामि । कक्ष्यां गच्छतु इत्युक्ते मम पुत्री न शृणोति एव । किन्तु चलचित्रगीतानि सदा शृणोति ।

मधुरा - मम गृहे सर्वेऽपि सङ्गीतप्रियाः । अतः सर्वदा भक्तिगीतानि, भावगीतानि, भजनानि, सर्वाणि अपि शृणुमः ।

सुनीता - मम गृहे अहम् एका एव गीतं शृणोमि। अन्ये सर्वे वार्तां शृण्वन्ति। चलचित्रगीतानि शृण्वन्ति, तावदेव ।

मधुरा - गृहे अस्माकं वचनानि केऽपि न शृण्वन्ति । ते यथा इच्छन्ति तथा कुर्वन्ति ।

सुनीता - किन्तु मम पार्श्वगृहे माता यत् वदति तत् सर्वेऽपि शृण्वन्ति, पालयन्ति च । किम् अन्यत् पतिः अपि सा यथा वदति तथा शृणोति, जानाति वा ?

मधुरा - केषुचित् गृहेषु मातुः वचनं गृहसदस्याः शृण्वन्ति । केषुचित् अन्ये यत् वदन्ति तत् माता शृणोति तावदेव ।